# અન્નપૂર્ણાકવચમ્

Annapurnakavacham

sanskritdocuments.org

February 19, 2019

# Annapurnakavacham

# અન્નપૂર્ણાકવચમ્

## Sanskrit Document Information

Text title : annapUrNAkavacham

File name : annapUrNAkavacham.itx

Category : devii, devI, pArvatI, annapUrNa, shankarAchArya, kavacha

Location : doc_devii

Author : Adi Shankaracharya

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# અન્નપૂર્ણાકવચમ્

દ્વાત્રિંશદ્વર્ણમન્ત્રોઽયં શઙ્કરપ્રતિભાષિતઃ ।
અન્નપૂર્ણા મહાવિદ્યા સર્વમન્ત્રોત્તમોત્તમા ॥ ૧॥

પૂર્વમુત્તરમુચ્ચાર્ય સમ્પુટીકરણમુત્તમમ્ ।
સ્તોત્રમન્ત્રસ્ય ઋષિર્બ્રહ્મા છન્દો ત્રિષ્ટુબુદાહૃતઃ ॥ ૨॥

દેવતા અન્નપૂર્ણા ચ હ્રીં બીજમમ્બિકા સ્મૃતા ।
સ્વાહા શક્તિરિતિ જ્ઞેયં ભગવતિ કીલકં મતમ્ ॥ ૩॥

ધર્માઽર્થ-કામ-મોક્ષેષુ વિનિયોગ ઉદાહૃતઃ ।
ૐ હ્રીં ભગવતિ માહેશ્વરિ અન્નપૂર્ણાયૈ સ્વાહા ।
સપ્તાર્ણવમનુષ્યાણાં જપમન્ત્રઃ સમાહિતઃ ॥ ૪॥

અન્નપૂર્ણે ઇમં મન્ત્રં મનુસપ્તદશાક્ષરમ્ ।
સર્વ સમ્પત્પ્રદો નિત્યં સર્વવિશ્વકરી તથા ॥ ૫॥

ભુવનેશ્વરીતિ વિખ્યાતા સર્વાઽભીષ્ટં પ્રયચ્છતિ ।
હૃલ્લેખેયમિતિ જ્ઞેયમોઙ્કારાક્ષરરૂપિણી ॥ ૬॥

કાન્તિ-પુષ્ટિ-ધના-ઽઽરોગ્ય યશાંસિ લભતે શ્રિયમ્ ।
અસ્મિન્ મન્ત્રે રતો નિત્યં વશયેદખિલં જગત્ ॥ ૭॥

અઙ્ગન્યાસઃ – ૐ અસ્ય શ્રીઅન્નપૂર્ણામાલામન્ત્રસ્ય બ્રહ્મા ઋષયે નમઃ શિરસિ । ૐ અન્નપૂર્ણાદેવતાયૈ નમઃ હૃદયે । ૐ હ્રીં બીજાય નમઃ નાભૌ । ૐ સ્વાહા શક્તયે નમઃ પાદયોઃ । ૐ ધર્મા-ઽર્થ-કામ-મોક્ષેષુ વિનિયોગાય નમઃ સર્વાઙ્ગે ।
કરન્યાસઃ – ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ૐ હ્રીં તર્જનીભ્યાં નમઃ । ૐ હ્રૂં મધ્યમાભ્યાં નમઃ । ૐ હ્રૈં અનામિકાભ્યાં નમઃ । ૐ હ્રીં કનિષ્ઠિકાભ્યાં નમઃ । ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
હૃદયાદિન્યાસઃ -ૐ હ્રાં હૃદયાય નમઃ । ૐ હ્રીં શિરસે

સ્વાહા । ૐ ઇહ શિખાયૈ વષટ્ । ૐ હ્રૈં કવચાય હુમ્ । ૐ હ્રૌં
નેત્રત્રયાય વૌષટ્ । ૐ હ્રઃ અસ્ત્રાય ફટ્ ।

ધ્યાનમ્ -

રક્તાં વિચિત્રવસનાં નવચન્દ્રચૂડાં
અન્નપ્રદાન-નિરતાં સ્તનભારનમ્રામ્ ।
નૃત્યન્તમિન્દુ સકલાભરણં વિલોક્ય
હૃષ્ટાં ભજે ભગવતીં ભવ-દુઃખ-હન્ત્રીમ્ ।

માલામત્રઃ -ૐ ઐં હ્રીં શ્રીં ક્લીં નમો ભગવતિ માહેશ્વરિ
અન્નપૂર્ણે ! મમાઽભિલષિતમન્નં દેહિ સ્વાહા ।

ૐ ઐં હ્રીં શ્રીં ક્લીં મન્દાર-કલ્પ-હરિચન્દન-પારિજાત-મધ્યે
શશાઙ્ક-મણિમણ્ડિત-વેદિસંસ્થે ।
અર્ધેન્દુ-મૌલિ-સુલલાટ-ષડર્ધનેત્રે ભિક્ષાં
પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૧॥

ૐ ઐં હ્રીં શ્રીં ક્લીં કેયૂર-હાર-કનકાઙ્ગદકર્ણપૂરે કાઞ્ચીકલાપ-
મણિકાન્તિ-લસદ્દુકૂલે । દુગ્ધા-ઽન્નપાત્ર-વર-કાઞ્ચન-દર્વિહસ્તે
ભિક્ષાં પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યમ્
ૐ ક્લીં શ્રી હ્રીં ઐં ૐ ॥ ૨॥

ૐ ઐં હ્રીં શ્રીં ક્લીં આલી કદમ્બપરિસેવિત-પાર્શ્વભાગે
શક્રાદિભિર્મુકુલિતાઞ્જલિભિઃ પુરસ્તાત્ । દેવિ! ત્વદીયચરણૌ શરણં
પ્રપદ્યે ભિક્ષાં પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં
ૐ ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૩॥

ૐ ઐં હ્રીં શ્રીં ક્લીં ગન્ધર્વ-દેવઋષિ-નારદ-કૌશિકાઽત્રિ-વ્યાસા-
ઽમ્બરીષ-કલશોદ્ભવ-કશ્યપાદ્યાઃ ।
ભક્ત્યા સ્તુવન્તિ નિગમા-ઽઽગમ-સૂક્ત-
મન્ત્રૈર્ભિક્ષા પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં ક્લીં
ૐ શ્રીં હ્રીં ઐં ૐ ॥ ૪॥

ૐ ઐં હ્રીં શ્રીં ક્લીં લીલાવચાંસિ તવ દેવિ! ઋગાદિવેદાઃ
સૃષ્ટ્યાદિકર્મરચના ભવદીયચેષ્ટા । ત્વત્તેજસા જગદિદં પ્રતિભાતિ
નિત્યં ભિક્ષાં પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૫॥

ૐ ઐં હ્રીં શ્રીં ક્લીં શબ્દાત્મિકે શશિકલાભરણાર્ધદેહે શમ્ભો-

રુરસ્થલ-નિકેતનનિત્યવાસે । દારિદ્ય-દુઃખભયહારિણિ કા ત્વદન્યા
ભિક્ષાં પ્રદેહિ ગિરિજે ! ક્ષુધિતાય મહ્યં ક્લીં શ્રીં ઐં ૐ ॥ ૬॥

ૐ ઐં હ્રીં શ્રીં ક્લીં સન્ધ્યાત્રયે સકલભૂસુરસેવ્યમાને સ્વાહા સ્વધાસિ
પિતૃદેવગણાર્તિહન્ત્રી । જાયા સુતાઃ પરિજનાતિથયોઽન્નકામાઃ ભિક્ષાં
પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૭॥

ૐ ઐં હ્રીં શ્રીં ક્લીં સદ્ભક્તકલ્પલતિકે ભુવનં કવન્દ્યે ભૂતેશ-
હૃત્કમલમગ્ન-કુચાગ્રભૃઙ્ગે ।
કારુણ્યપૂર્ણનયને કિમુપેક્ષસે માં ભિક્ષાં
પ્રદેહિ ગિરજે ક્ષુધિતાય મહ્યં ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૮॥

ૐ ઐં હ્રીં શ્રીં ક્લીં અમ્બ! ત્વદીય-ચરણામ્બુજ-સંશ્રયેણ બ્રહ્માદયો-
ઽપ્યવિકલાં શ્રિયમાશ્રયન્તે । તસ્માદહં તવ નતોઽસ્મિ પદારવિન્દે
ભિક્ષાં પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૯॥

ૐ ઐં હ્રીં શ્રીં ક્લીં એકાગ્રમૂલનિલયસ્ય મહેશ્વરસ્ય પ્રાણેશ્વરિ!
પ્રણત-ભક્તજનાય શીઘ્રમ્ । કામાક્ષિ-રક્ષિત-જગત્-ત્રિતયેઽન્નપૂર્ણે
ભિક્ષાં પ્રદેહિ ગિરિજે! ક્ષુધિતાય મહ્યં ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૧૦॥

ૐ ઐં હ્રીં શ્રીં ક્લીં ભક્ત્યા પઠન્તિ ગિરિજાદશકં પ્રભાતે
મોક્ષાર્થિનો બહુજનાઃ પ્રથિતાન્નકામાઃ । પ્રીતા મહેશવનિતા હિમશૈલ-
કન્યા તેષાં દદાતિ સુતરાં મનસેપ્સિતાનિ ક્લીં શ્રીં હ્રીં ઐં ૐ ॥ ૧૧॥

ઇતિ શ્રીશઙ્કરાચાર્યવિરચિતમન્નપૂર્ણાકવચં સમાપ્તમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Annapurnakavacham*
pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*